"अनेकपादद्दिव्रघ्नः पिनाकी च परन्तपः" ॥
विष्णुः । यथा, विष्णुसंहितायाम् ।
"चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" ॥
एकः पादो यस्य इति विग्रहे वाच्यलिङ्गः ॥)

एकपिङ्गः, पुं, (एकं पिङ्गं पिङ्गलवर्णं नेत्रं यस्य ।) कुवेरः । इत्यमरः ॥ (कुवेरस्य पिङ्गनेत्रकथा उक्ता काशीखण्डे । यथा,—
"प्रसार्य्य नयने पूर्ब्बमुमामेव व्यलोकयत् ।
शम्भोः समीपे का योषिदेषा सर्व्वाङ्गसुन्दरी ॥
अनया किं तपस्तप्तं ममापि तपसोऽधिकम् ।
अहो रूपमहो प्रेम सौभाग्यश्रीरहो भृशम् ।
क्रूरदृग्वीक्षते यावत् पुनः पुनरिदं वदन् ।
तावत् प्रस्फोटितं नेत्रं वामं वामविलोकनात् ॥
अथ देव्यब्रवीद्देवं किमसौ दुष्टतापसः ।
असकृद्वीक्षते मां वै पुनर्मामेव पश्यति ॥
असूयमानो मे रूपं प्रेमसौभाग्यसम्पदः ।
इति देवीगिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः ॥
उमे! त्वदीयपुत्त्रोऽयं न च क्रूरेण चक्षुषा ।
संपश्यते तपोलक्ष्मीं तव किन्त्वधिवर्णयन् ॥
इति देवीं समाभाष्य तमीशः पुनरब्रवीत् ।
वरं ददामि ते वत्स! तपसानेन तोषितः ॥
निधीनामधिनाथस्त्वं गुह्यकानां भवेश्वरः ।
यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत ! ॥
पतिः पुण्यजनानाञ्च सर्व्वेषां धनदो भव ।
मया सख्यञ्च ते नित्यं वत्स्यामि च तवान्तिके ॥
अलकां निकषामित्र ! तव प्रीतिं विवर्द्धयन् ।
आगच्छ पादयोरस्याः पत ते जननी त्वियम् ॥
इति दत्त्वा वरान् देवः पुनराह शिवः शिवाम् ।
प्रसादं कुरु देवेशि ! तपस्विन्यङ्गजे तव ।
देव्युवाच ।
वत्स ! ते निर्म्मला भक्तिर्भवे भवतु सर्व्वदा ।
भवैकपिङ्गो नेत्रेण वामेन स्फुटितेन च ॥
देवदत्तास्तु ये तुभ्यं वराः सन्तु तथैव ते ।
कुवेरो भव नाम्ना त्वं मम रूपेर्ष्यया सुत" ॥)

एकपिङ्गलः, पुं, (एकं पिङ्गलं नेत्रं यस्य ।) कुवेरः । इत्यमरटीकायां भरतः ॥ (अस्य पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकभक्तव्रतं, क्ली, (एकं भक्तं भोजनं यत्र तत् व्रतम् ।) रात्रिभोजनाभावविशिष्टदिवाभोजनम् । तथा च स्कन्दपुराणे ।
"दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं रात्रौ तन्न कदाचन" ॥
(अस्य व्रतस्य नियमफलादिकमुक्तं विष्णुधर्म्मोत्तरे । तद्यथा,—
"चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत् ।
सुवर्णमणिमुक्ताढ्यं गार्हस्थ्यं समवाप्नुयात् ॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यहन्याष्टशतं जपेत् ॥
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात् ।
यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः ॥
अहिंस्रः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यहन्याष्टशतं जपेत् ॥
पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥
तस्माद्यथाविह चागत्य माहात्म्यं प्रतिपद्यते" ॥ इति ॥)

एकमूला, स्त्री, (एकं मूलं यस्याः ।) शालपर्णी । अतसी । इति वैद्यकम् ॥ (एकमेव मूलं यस्य इति विग्रहे एकमूलविशिष्टे, त्रि ॥)

एकयष्टिका, स्त्री, (एका यष्टिरिव ।) हारविशेषः । एकनरि हार इति भाषा । तत्पर्य्यायः । एकावली २ । इत्यमरः ॥

एकरजः, पुं, (रज्यते इति रजः । एको मुख्यो रजः । रञ्जनद्रव्यम् ।) भृङ्गराजवृक्षः । इति जटाधरः ॥ (भृङ्गराजशब्देऽस्य गुणादयो बोद्धव्याः ॥)

एकलः, त्रि, (एक + ला + क ।) एक की । इति पद्यावली ॥ एकला इति भाषा । (यथा भागवते ५ । ७ । १० । "तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्तउपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमाप" ॥)

एकलिङ्गं, क्ली, (एकं लिङ्गं यस्य ।) स्थानविशेषः । तथा च आगमे ।
"पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते ।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" ॥

एकलिङ्गः, पुं, (एकं लिङ्गं पिङ्गलनेत्ररूपं चिह्नं यस्य सः ।) कुवेरः । इति शब्दरत्नावली ॥ (पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकवर्णी, स्त्री, (एकमेव शब्दं वर्णयति या । एक + वर्ण + अच् । गौरादित्वात् ङीष् ।) वाद्यभेदः । तत्पर्य्यायः । करताली २ कङ्कमाला ३ कलङ्कषा ४ इति शब्दरत्नावली ॥

एकवर्षिका, स्त्री, (एको वर्षो यस्याः । कः । इत्वम् ।) एकहायनी गौः । इति हेमचन्द्रः ॥ एकवत्सरेर बकना इति भाषा ॥

एकवादः, पुं, (एकोऽभिन्नस्वरो वादः वाद्यम् । डिण्डिम इति एकरूपवाद्यत्वादस्य तथात्वम् ।) डिण्डिमवाद्यम् । इति शब्दरत्नावली ॥

एकविंशतिः, स्त्री, (एकाधिका विंशतिः ।) एकाधिकविंशतिसंख्या । एकुश इति भाषा । यथा । मनुः ५ । ३५ ।
"नियुक्तस्तु यथान्यायं यो मांसं नात्त्यलोलुपः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्" ॥

एकवीरः पुं, वृक्षभेदः । तत्पर्य्यायः । महावीरः २ सङ्कवीरः ३ सुवीरकः ४ । अस्य गुणाः । मदकारित्वम् । अत्युष्णत्वम् । कटुत्वम् । तोदवातनाशित्वम् । चटुलीकटिपृष्ठादिचलपक्षाभिघातहारित्वञ्च । इति राजनिर्घण्टः ॥ (त्रि, एकः अद्वितीयो वीरः । वीरवरः । प्रशस्तवीर्य्यशाली । यथा भागवते ३ । १ । ४० ।
"अहो पृथापि ध्रियतेऽर्भकार्थे
राजर्षिवर्य्येण विनापि तेन ।
यस्त्वेकवीरोऽधिरथो विजिग्ये
धनुर्द्वितीयः ककुभश्चतस्रः" ॥)

एकवृत्तः, पुं, (एको वृत्तो यस्मिन् ।) स्थानभेदः ।
"चतुःक्रोशान्तरे यत्र न वृत्तान्तरमीक्ष्यते ।
एकवृत्तः स विज्ञेयः" । इति आगमः ॥ (एकोऽद्वितीयो वृत्तः इति विग्रहे एकस्मिन् वृत्ते । यथा सारमञ्जरी । "एकवृत्तः पञ्चनौका भवति" । एको वृत्त इति पाठान्तरम् ॥)

एकशफः, पुं, (एकः शफः खुरो यस्य । अखण्डखुरत्वात् तथात्वम् ।) घोटकः । इति त्रिकाण्डशेषः ॥ एकखुरजन्तुमात्रम् । यथा ।
"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्" ॥
इति श्रीभागवतम् ॥ ३ । १० । २२ ॥ (अस्य दुग्धदधि-मूत्र-मांसादिगुणा अश्वशब्दे ऐकशफशब्दे च ज्ञातव्याः ॥)

एकशृङ्गः, पुं, (एकं शृङ्गं यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (स्वायम्भुवमन्वन्तरे अकालप्रलयात् मत्स्यरूपधरस्यास्य शृङ्गे मनोर्नौर्बद्धा । तत्कथा यथा कालिकापुराणे ३२ अध्याये ।
"स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै तदा ।
ततो जलानामुपरि सशृङ्ग इव पर्ब्बतः ॥
उद्दीप्तस्त्वेकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिरात् यत्रास्ते समनुर्हरिः" ॥
विस्तृतिस्तु अकालिकशब्दे द्रष्टव्या ।) एकशृङ्गयुक्तपशुमात्रम् ॥ (पितृगणभेदः । यथा, महाभारते २ । ११ । ४१-४३ ।
"पितृणाञ्च गणान् विद्धि सप्त वै पुरुषर्षभ ! ।
मूर्त्तिमन्तो हि चत्वारस्त्रयश्चाप्यशरीरिणः ॥
वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत ।
गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥
सोमपा एकशृङ्गाश्च चतुर्व्वेदाः कलास्तथा ।
एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप" ॥)

एकषष्टिः, स्त्री, (एकाधिका षष्टिः ।) संख्यासंख्येयविशेषः । इत्यमरः ॥ ६१ एकषट्टि इति भाषा । (यथा भागवते ६ । ६ । ३० ।
"सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु" ।)

एकसर्गः, त्रि, (एकस्मिन् विषये सर्गो निश्चयो यस्य ।) एकाग्रः । इत्यमरः ॥

एकसूत्रः, पुं, (एकं सूत्रं यस्य । एकसूत्रेण वादनात् तथात्वम् ।) डमरुवाद्यम् । इति शब्दरत्नावली ॥

एकहायनी, स्त्री, (एकः हायनो यस्याः । "दामहायनान्ताच्च" । ४ । १ । २७ । इति ङीप् ।) एकवर्षीयगवी । एकवत्सरेर बाछुर इति भाषा । तत्पर्य्यायः । एकाब्दा २ । इत्यमरः ॥ (पुंसि प्रमाणं यथा, मनुः ११ । १३६ ।
"वासो दद्याद्धयं हत्वा पञ्च नीलान् वृषान् गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम्" ॥
"अश्वं हत्वा वस्त्रं दद्यात् हस्तिनं हत्वा पञ्च नीलान् वृषभान् दद्यात् प्रत्येकं छागमेषौ हत्वा वृषभं दद्यात् गर्द्दभं हत्वा एकवर्षं वत्सं दद्यात्"
इति कुल्लुकभट्टः ॥)

एका, स्त्री, (एक + टाप् ।) दुर्गा । यथा ।
"एका गुणार्थां त्रैलोक्ये तस्मादेका स उच्यते" ।